# विद्यास्थानानां विश्लेषणे, अध्ययने च आधुनिक तन्त्रज्ञानोपयोगः

वेदवारिधिः प. रामानुजः

भारतीयपरम्परा तथा भाषाणां सङ्गणनकार्यनिष्ठे अस्मद्गणे प्रगतसङ्गणनविकासकेन्द्रे बेंगलूरुपरिसरे सङ्गणक-यन्त्रसाहाय्येन द्वाविंशतेः वर्षेभ्यः क्रियमाणानुसन्धानविषये किञ्चिदत्र प्रस्तूयते । अन्तर्जाले चतुर्दशविद्यास्थानानां विषयेऽपि अस्माकं गणतः उपलभ्यमानसंसाधनानां दर्शनम् उपयोगश्च अन्तर्जालपृष्ठे http://parankusan.cloudapp.net:8080/ihg, तथा अस्मत्पितृचरणानां कीर्तिशेषाणां सलक्षणघनपाठिनां महाविदुषां भूलोकनित्यसूरीणां पराङ्कुशाचार्यवर्याणां पुण्यस्मृतावायोजितायाः पराङ्कुशाचार्य वैदिक अध्ययन संस्थायाः अन्तर्जालपृष्ठे च https://parankusan.cloudapp.net इत्यत्र च शक्यम् ।

**वेदाः – ऋक्, यजुस्, साम, अथर्ववेदः – तेषां विषये उपलभ्यमानविषयविवरणानि**

1. ऋग्वेदे - संहितापाठः (मण्डल, अष्टक पद्धत्योः), पदपाठः, क्रमपाठः, ऋषिः, छन्दः, देवता, विनियोगः, ब्राह्मणम्, आरण्यकम्, उपनिषद्, **प्रतिग्रन्थं** विविधसूच्यः (मन्त्रसूची, पदसूची, सूक्तसूची, अनुवाकसूची, प्रपाठकसूची, समस्तपदसूची, समस्तानां उत्तरपदसूची), विकृतिपाठाः (जटा, घनः इत्यादि ....) वेदाङ्गानि (शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः - आश्वलायनश्रौतसूत्रम्, ऋग्विधानम्), लघुऋक्तन्त्रम्, लक्षणग्रन्थाः (प्रातिशाख्यं, सप्तलक्षणं, क्रमदीपिका, बोन्दलक्षणं, बैठ् परिभाषा, रावणबैट्, वर्णक्रमपाठः), पाण्डुलिपयः, ऋग्भाष्यं - सायणस्य, वेङ्कटमाधवस्य, मध्वाचार्याणां च, ऋक्सूक्तनिरुक्तं, यान्त्रिकप्रक्रियाः, विदुषाम् उपन्यासाः इत्यादयः ।

2. कृष्णयजुर्वेदे - संहितापाठः (सारस्वत, आर्षेयक्रमयोः), पदपाठः, क्रमपाठः, काण्डऋषिः, छन्दः, देवता, विनियोगः - अनुवाकार्थसंग्रहः (सायणीयः भट्टभास्करीयश्च), काण्ड, प्रश्नादिप्रतिपाद्यसंग्रहः (आर्षेयपाठात्), ब्राह्मणम्, आरण्यकम्, उपनिषद्, एकाग्निकाण्डः, काठकं, **प्रतिग्रन्थं** विविधसूच्यः (मन्त्रसूची, पदसूची, पञ्चाशद्, दशतिसूची, प्रश्नसूची, अनुवाकसूची, इङ्ग्यपदसूची, इङ्ग्यानाम् उत्तरपदसूची), विकृतिपाठाः (जटा, घनः इत्यादि ....) वेदाङ्गानि (शिक्षा - व्यास, भारद्वाज, आरण्यक, कौण्डिन्य, शम्भु, प्लुत, वासिष्ठ, कालनिर्णय, पारि), व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः - आपस्तम्ब, बौधायन, मानव, सत्याषाढ श्रौतसूत्राणि, श्रौतं, गृह्य, धर्म, परिभाषा, शुल्ब, पितृमेधसूत्राणि सव्याख्यानि), लक्षणग्रन्थाः (मूलं, व्याख्याश्च - प्रातिशाख्यं, सप्तलक्षणं, षड्विंशतिसूत्रं, जटादर्पणः, घनदर्पणः, काण्डानुक्रमणिका, वर्णक्रमदर्पणः, वैद्यनाथबैट्, रावणबैट्, अनेके स्वरविषयकग्रन्थाः), - पाण्डुलिपयः, तासां टङ्कितानि, भाष्ये - सायणीय, भट्टभास्करीयौ, यान्त्रिकप्रक्रियाः, वेदवेदिकादिलेखनानि, स्वरमञ्जरीप्रभृतयः, विदुषाम् उपन्यासाः ।

3. शुक्लयजुषि उपलभ्यमानपर्यन्तं - संहिता, पदपाठः, भाष्यम् - अनन्ताचार्यस्य, सूच्यादि, अनन्ताचार्यभाष्यं, यान्त्रिक-प्रक्रियाः, विदुषाम् उपन्यासाः ।

4. सामवेदे - कौथुमशाखायां - आर्चिकपाठः (पूर्व, महानाम्नी, उत्तर आर्चिकयोः), पदपाठः – छन्दः, स्तोभः, ऋषिः, छन्दः, देवता, विनियोगः, सप्तस्वरादि, गानं – रहस्य, ऊह, आरण्यगेय), भाष्यं, **प्रतिग्रन्थं** विविधसूच्यः (सामसूची, पदसूची, अर्धसूची, अनुवाकसूची, प्रपाठकसूची, समस्तपदसूची, समस्तानाम् उत्तरपदसूची), वेदाङ्गानि (शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः - खादिरगृह्य, श्रौतसूत्रम्), लक्षणग्रन्थाः (पुष्पसूत्रम्), सप्तलक्षणम्, यान्त्रिकप्रक्रियाः, जैमिनीयशाखाविषयकाः पाण्डुलिपयः, विदुषाम् उपन्यासाः ।

5. अथर्ववेदपैप्पलादसंहिता, सूच्यः, यान्त्रिक-प्रक्रियाः ।

6. दोषापाकरणेन सम्पादनं, दृष्टान्तानां झटिति आकरान्वेषणम्, अपेक्षितस्थले उपस्थापनं, संबन्धनं च, लिप्यन्तरणं, विदुषाम् उपन्यासानां लेखनं, आकरप्रदर्शनरूपसन्दर्भदानं, ग्रन्थान्तरैः यथापेक्षं संबन्धनं च ।

7. एवमेव वेदाङ्गानाम् उपाङ्गानां च विषये सर्वे आकरग्रन्थाः, सूत्र, वार्तिक, भाष्यादि च यथायथम् आयोजितमस्ति।

8. एषां गवेषण, विश्लेषणाद्यर्थं संगणकयन्त्राधारित प्रकल्पाः अपि अस्मिन् जालपुटे लभ्याः सन्ति ।

9. एतैः आधुनिकरीत्या प्राचीनज्ञानभाण्डारस्य आस्वादनं सुकरं, रोचकं च भवेदित्याशास्महे ।

10. अत्रत्यविषयाणां विषये स्वाभिप्राय, दोषनिर्देश, समीकरणसलहादयः विद्वद्भ्यः सर्वदा स्वागतं भजन्ते अस्मत्पक्षतः इति कृपया विद्वांसः विशेषज्ञाः तन्त्रज्ञाश्च एतमामूलचूडं दृष्ट्वा स्वाभिप्रायादिभिः अनुगृह्णन्त्विति प्रार्थ्यते ।